# Uttangakritam Naga Stotram

# उत्तङ्ककृतं नागस्तोत्रम्

## Document Information

Text title : Uttangakritam Naga Stotram

File name : uttangakRRitaMnAgastotram.itx

Category : deities_misc, mahAbhArata, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | Adiparva | adhyAya 3/139-146||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# उत्तङ्ककृतं नागस्तोत्रम्

य ऐरावतराजानः सर्पाः समितिशोभनाः ।
वर्षन्त इव जीमूताः सविद्युत्पवनेरिताः ॥ १३९॥

सुरूपाश्च विरूपाश्च तथा कल्माषकुण्डलाः ।
आदित्यवन्नाकपृष्ठे रेजुरैरावतोद्भवाः ॥ १४०॥

बहूनि नागवर्त्मानि गङ्गायास्तीर उत्तरे ।
इच्छेत्कोऽर्कांशुसेनायां चर्तुमैरावतं विना ॥ १४१॥

शतान्यशीतिरष्टौ च सहस्राणि च विंशतिः ।
सर्पाणां प्रग्रहा यान्ति धृतराष्ट्रो यदेजति ॥ १४२॥

ये चैनमुपसर्पन्ति ये च दूरं परं गताः ।
अहमैरावतज्येष्ठभ्रातृभ्योऽकरवं नमः ॥ १४३॥

यस्य वासः कुरुक्षेत्रे खाण्डवे चाभवत्सदा ।
तं काद्रवेयमस्तौषं कुण्डलार्थाय तक्षकम् ॥ १४४॥

तक्षकश्चाश्वसेनश्च नित्यं सहचरावुभौ ।
कुरुक्षेत्रे निवसतां नदीमिक्षुमतीमनु ॥ १४५॥

जघन्यजस्तक्षकस्य श्रुतसेनेति यः श्रुतः ।
अवसद्यो महद्द्युम्नि प्रार्थयन्नागमुख्यताम् ॥ १४६॥

करवाणि सदा चाहं नमस्तस्मै महात्मने ॥ १४६॥

इति महाभारते आदिपर्वणि ३ अध्यायान्तर्गतं
उत्तङ्ककृतं नागस्तोत्रं सम्पूर्णम् ।

महाभारत । आदिपर्व । अध्याय ३/१३९-१४६॥

mahAbhArata . Adiparva . adhyAya 3/139-146..

Proofread by PSA Easwaran

*Uttangakritam Naga Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*